

अथश्रीमद्भागवतद्वितीयस्कंधचूर्णिकाप्रारंभः



श्रीगणेशायनमः श्रीकुलदेवतायैनमः अथद्वितीयस्कंधव्याख्या श्रीशुकउवाच हेनृपपुंसांश्रोतव्यादिषुश्रेष्ठःआत्म-
विदांसंमतः एषः तेप्रश्नः वरीयान् यतः लोकहितं भवति हेराजेंद्रनृणांश्रोतव्यानितुबहूनिसंति तथापि आत्मतत्वंअपश्यतां
गृहमेधिनांतेषां आयुः वृथैवगच्छति निद्रयाह्रियतेनक्तं व्यवायेनचवावयः दिवाचार्थेहयाराजन् कुटुंबभरणेनवा एवंदेहा
पत्यकलत्रादिषु असत्स्वपितेषांनिधनंपश्यन्नपि आत्महितंनपश्यति तस्मात् हेराजन् अभयंइच्छतापुंसा सर्वात्माहरिः श्रो
तव्यः कीर्तितव्यः स्मर्तव्यः पुंसांअंतेनारायणस्मृतिः अयमेव परोलाभः किंचप्रायः मुनयः विधिनिषेधातीताः ब्रह्मिष्ठाअपिहरि
गुणानुकथनेरमंते तदिदं भगवद्गुणानुकथनरूपं श्रीभागवतंनामपुराणंब्रह्मसंमितं अहंनैर्गुण्येपरिनिष्ठितोऽपिहरिलीलया
गृहीतचेताः सन् द्वापरादौपितुः द्वैपायनात् अधीतवान् तत् अहंतेअभिधास्यामि हेनृपमुमुक्षूणांअकुतोभयंइच्छतांनृणांए-
तदेवसद्भिः निर्णीतम् अल्पमेवमेआयुः अवशिष्टंकिमहंसाधयेयंइतिमाशुचइत्याह रेखट्वांगोनामराजामुहूर्तमितंस्वायुः ज्ञा-
त्वासर्वंउत्सृज्य अभयंहरिंप्राप्तः हेनृपतवतुसप्ताहंजीवितावधिरस्ति तावत् पारलौकिकंसाधनंसंपादय अंतकालेप्राप्ते असंगश
स्त्रेणदेहादिसुखेच्छांछित्वागृहात्प्रव्रज्यविविक्तेआसीनः सन् मनसाप्रणवंअभ्यसेत् किंच जितश्वासः सन् मनोवशीकुर्यात् मन
साविषयेभ्यः इंद्रियाणिनियम्यबुध्यामनः भगवद्रूपेधारयेत् तत्रएकैकंपादाद्यवयवंध्यात्वाततः किंचिननस्मरेत् यत्रमनः प्रसीद-
ति तत् विष्णोः पदंकिंच रजस्तमोभ्यांआक्षिप्तंमनः धारणयानियच्छेत् यस्यांक्रियमाणायांभक्तियोगः आशुसंपद्यते राजोवा
च हेब्रह्मन् हरेः यादृशीभावनाकर्तव्यातांवद श्रीशुकउवाच जितासनोजितश्वासोजितसंगोजितेंद्रियः इत्यादिनाभगवतःवि १
राड्रूपेधियामनः संधारयेत् तद्व्यक्ति यत्रत्रैकालिकंविश्वं दृश्यतेसःविराड्देहः तस्मिन् धारणाश्रयः भगवान् तस्यपादमूलंपातालं पा-

ओ॰ ३ रत्या॰

र्ष्णिप्रपदेरसातलं गुल्फौमहातलं जंघेतलातलं जानुनीसुतलं ऊरुद्वयंवितलं अतलंच जघनंमहीतलं नाभिर्नभस्तलं उरः स्वर्गः ग्रीवामहर्लोकः वदनंजनलोकः ललाटंतपोलोकः शीर्षाणिसत्यलोकः इंद्रादयोबाहवः कर्णौदिशः श्रोत्रंशब्दः नासत्यौनासे घ्राणंगंधःअग्निर्मुखं अंतरिक्षं अक्षिणी चक्षुःसूर्यः रात्र्यहनीपक्ष्माणि भ्रूविजृंभः ब्रह्मपदं तालुः आपः रसोजिव्हा शिरोवेदाः दंष्ट्रायमः दंताःस्नेहलेशः हासोमाया सर्गः कटाक्षःउत्तरोष्ठोलज्जा अधरः लोभः धर्मः स्तनः पृष्ठः अधर्मः प्रजापतिःशिश्नं मित्रौ वृषणौ समुद्राःकुक्षिः अस्थिसंघाः गिरयः नाड्यः नद्यः रोमाणिवृक्षाः श्वासःवायुःगतिः कालः संसारः कर्मकेशाः मेघाः संध्यावासः प्रधानंहृदयम् मनःइंदुः चित्तंमहत्तत्वं अहंकारोरुद्रः नखानि अश्वादयः श्रोणिदेशेमृगादयः शिल्पनैपुण्यंपक्षिणः बुद्धिर्मनुःनिवासोमनुजः गंधर्वादयःस्वराः प्रह्लादः स्मृतिः ब्राह्मणाः मुखम् भुजाः क्षत्रियाः ऊरूवैश्याः पादाः शूद्राः इयान्ईश्वरविग्रहस्य सन्निवेशः मयातेकथितः अस्मिन् बुध्यामनः संधार्यते तंसत्यम् आनंदनिधिंभजेत नान्यत्रसज्जेत ३९ इतिद्वितीयेप्रथमः १ श्रीशुकउवाच एवंधारणया आत्मयोनिः पुरानष्टांस्मृतिंलब्ध्वा यथापूर्वंइदंसर्वंससर्ज हेराजन् साधकस्यधीः व्यर्थैः स्वर्गादिनामभिः तत्तदिच्छांकरोति इतियत् सः वेदस्यकर्मफलबोधनप्रकारः परंतुतत्तल्लोकं प्राप्तोऽपिनिरवद्यंसुखं नलभते अतः कविः भोग्येर्थे अन्यथासिद्धेसति यत्नश्रमंपश्यन् नयतेत तदाह सत्यांक्षितौकिंकशिपोः प्रयासैर्बाहौस्वसिद्धे ह्युपबर्हणैः किं सत्यंजलौकिंपुरुधान्नपात्र्या दिग्वल्कलादौसतिकिंदुकूलैः १ चीराणिकिंपथिनसंतिदिशंति भिक्षांनैवांध्रिपाः परभृतः सरितोऽप्यशुष्यन् रुद्धागुहाः किमजितोवतिनोपसन्नान् कस्माद्भजंतिकवयोधनदुर्मदांधान् २ एवंविरक्तः सन् स्वचित्ते स्वतएवसिद्धं आत्मानंभजेत् यद्भजनेन अविद्यानाशोभवति तांधारणांत्यक्त्वा पशून्विनाविषयचिंतांकोनामकुर्यात् केचित्स्वदेहांतर्हृदयावकाशेप्रादेशमात्रं

अ० २ नेत्रगोलके.

चतुर्भुजं शंखादियुक्तं पीतवाससं किरीटांगदकुंडलं कौस्तुभश्रीवत्सवनमालायुक्तं प्रसन्नवक्त्रं नलिनायतेक्षणं मेखलयाविभू
षितं नूपुरकंकणादिभिरलंकृतं ईश्वरं ईक्षते यावन्मनोधारणयावतिष्ठते किंच गदाभृतः पादादियावद्धसितं एकैकशः अं
गानिध्यायेत् तत्र जितं जितं स्थानं त्यक्त्वा परं परं अवयवं ध्यायेत् एवं विश्वेश्वरे यावद्भक्तियोगः नजायते तावत् प्रयतः सन् क्रि
यावसाने पुरुषस्य रूपं स्मरेत् अथ यतिः इमं लोकं जिहासुः स्थिरं आसनं आश्रितः मनसा सह प्राणं नियच्छेत् मनः क्षेत्रज्ञे बु
द्ध्या नियम्य तं आत्मनि नियम्य आत्मैवाहमिति लब्धशांतिः सन् कृत्याद्विरमेत तदेवाह यत्र कालसत्वादिगुणादयः स
मर्थाः न तद्वैष्णवं पदं हृदोपगुह्य मुनिः उपरमेत् इदानीं तस्य देहत्यागप्रकारमाह पुरुषः स्वपार्ष्णिनागुदं पीड्य जितश्रमः सन्
वायुं षट्सुस्थानेषु उन्नमयेत् तदाह नाभ्यां मणिपूरकचक्रे स्थितं प्राणं हृदि अनाहतचक्रे अधिरोप्य ततः उरसि विशुद्धिच-
क्रे नीत्वा ततः स्वतालुमूलं नीत्वा ततः शनैः भ्रुवोरंतरं नीत्वा ब्रह्मरंध्रं निर्भिद्य देहं विसृजेत् एवं सद्योमुक्तिं उत्क्रांक्रममुक्तिमाह
हे नृप यदि पारमेष्ठ्यादिपदानि गंतुमिच्छति तर्हि मनसेंद्रियैश्च सह तत्तल्लोकभोगार्थं गच्छेत् योगेश्वराणां गतिः त्रिलोक्याः अंतः
बहिश्च भवति कर्मिणः तां गतिं नाप्नुवंति सः योगी सुषुम्नया शैशुमारं चक्रं याति ततः तच्छित्वा एक एव लोकनमस्कृतं महर्लोकं
उपैति ततः प्रलये इदं विश्वं दह्यमानं वीक्ष्य पारमेष्ठ्यं याति तत्र शोकादयो न तत्र ब्रह्मलोकगतानां त्रिविधा गतिः ये पुण्यो
त्कर्षेण गताः तेऽधिकारिका भवंति ये तु हिरण्यगर्भाद्युपासनाबलेन गतास्ते ब्रह्मणा सह मुच्यंते ये तु भगवदुपासकाः ते स्वे
च्छया ब्रह्मांडं भित्वा वैष्णवं पदं यांति प्रसक्तस्य भक्तस्य ब्रह्मांडभेदनप्रकारमाह भक्तस्तु पृथिव्यादीनां शरीरे ये अंशाः २
ते पृथिव्यादिषु विलाप्य अनेन क्रमेण आनंदमयः सन् शांतं आत्मानं उपैति हे नरदेव ते एतौ मार्गौ गीतौ इह संसारे वासु

देवभक्तिं विना अन्यः शिवः पंथाः नहे राजन् तस्मात् सर्वात्मना हरिः श्रोतव्यः कीर्तितव्यः स्मर्तव्यः ये हरिकथामृतं पिबंति ते पूतात्मानः तच्चरणसरोरुहांतिकं व्रजंति ३७ इतिद्वितीये द्वितीयः २ श्रीशुकउवाच हे राजन् भवान् यत् पृष्टवान् तत् म्रियमाणानां नृणां एतत् निगदितम् अथ ब्रह्मवर्चसकामः ब्रह्माणं यजेत इंद्रियकामः इंद्रम् प्रजाकामः दक्षादीन् श्रीकामः दुर्गाम् तेजस्कामः अग्निम् द्रव्यकामः वसून् वीर्यकामः रुद्रान् अन्नादिकामः अदितिम् स्वर्गकामः आदित्यान् राज्यकामः विश्वान् देवान् देशस्थप्रजानां स्वाधीनतां इच्छन् साध्यान् आयुःकामः अश्विनौ पुष्टिकामः इलां प्रतिष्ठाकामो द्यावापृथिवीरूप कामो गंधर्वान् स्त्रीकामः उर्वशीं सर्वेषां आधिपत्यकामः परमेष्ठिनम् यशःकामः यज्ञम् कोशस्कामो वरुणम् विद्याकामः शंभुम् दांपत्यप्रीतिकामः उमाम् धर्मकामः विष्णुम् पुत्रकामः पितॄन् बाधानिवृत्तिकामः यक्षान् राज्यकामो मनून् शत्रुवधकामः राक्षसम् विषयकामः सोमम् वैराग्यकामः विष्णुं बलकामो मरुद्गणान् अकामः सर्वकामो वा मोक्षकामो वा भक्तियोगेन परं पुरुषं यजेत इह यजतां यद्भगवति भावः सत्संगश्च एतावान् एव निःश्रेयसोदयः अतः हरिकथासु रतिं को न कुर्यात् शौनकउवाच राजा इति श्रुत्वा शुकं प्रति किं अन्यत् पृष्टवान् तद्वद किंच असौ सूर्यः अस्तं उदयं च गच्छन् प्राणिनां आयुर्वृथा हरति हरिकथया यत्क्षणो नीतः तं ऋते ननु जीवनमेव तेषां आयुषः फलमिति चेत्तर्हि तरवः किं न जीवंति भस्त्राः किं न श्वसंत्युत न खादंति न मेहंति किं ग्रामपशवोऽपरे १ न यत्कर्णपथोपेतो जातु नाम गदाग्रजः श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः २ किंच नरस्य कर्णपुटे उरुक्रमविक्रमान् ये न शृण्वतः ते बिले एव या हरिगाथाः न गायति सा दार्दुरिके व जिह्वा यत् मुकुंदं न नमेत् तत् शिरः परं भारः हरेः पूजां यौ न कुरुतः तौ करौ शवतुल्यौ ये विष्णोः मूर्तिं न निरीक्षतः ते नयने बर्हायिते हरेः क्षेत्राणि यौ न ग

भा॰द्वि॰ च्छतः तौपादौद्रुमाविव साधूनांअंघ्रिरेणुंयः नलभेत् सःजीवन्शवः यः तुलस्याः गंधंनवेद सः श्वसन्शवः यद्धरिनामभिः नवि
३ क्रियेततत्धृदयं अश्मसारमित्यादि हेसूतवैयासकिः नृपतिंप्रति यत् आत्मविद्यां आहतांनः अभिधेहि २५ इतिद्वितीये चू॰
तृतीयः ३ सूतउवाच परीक्षित् आत्मतत्वनियामकंशुकवचोनिशम्य कृष्णेसतींमतिंव्यधात् देहजायासुतागारप
शुद्रविणबंधुषु राज्येचममतांत्यक्त्वाकृष्णानुभावश्रवणेश्रद्दधानः त्रैवर्गिकंकर्मफलंहित्वाइममेवार्थं पुनःपप्रच्छ राजो
वाच हेब्रह्मन्तेवचः समीचीनं येनममअज्ञानंनश्यति अतः अहंपृच्छामि यथाभगवान् आत्ममायया इदंविश्वंसृजति गोपाय
ति संयच्छति स्वयंक्रीडन् एवंशक्त्याकरोति हरेश्चेष्टितंकविभिर्दुर्ज्ञेयमिवाभाति किंच प्रकृतेःगुणान् एकःपरमात्मायुगपत्क्र
मशोवा बिभर्ति तत्मेवद भवान् शाब्देपरेच ब्रह्मणिनिष्णातोऽसि श्रीशुकउवाच परस्मैप्रपंचस्य उद्भवस्थाननिरोधेषु
निमित्तभूतलीलयागृहीतशक्तित्रितयायपुरुषायनमः सतांसंकटच्छिदेकुयोगिनांदूरकाष्ठाय भक्तपारगायनमः यत्कीर्तनं
यत्स्मरणंयदीक्षणं यद्वंदनं यच्छ्रवणंयदर्हणम् लोकस्य सद्योविधुनोतिकल्मषंतस्मैसुभद्रश्रवसेनमोनमः १ विवेकिनः यच्च
रणासेवनात् ब्रह्मगतिंविंदंतितस्मैनमः तपस्विनः दानादिपराअपियदर्पणंविनाक्षेमं नविंदंतितस्मैनमः किंच किरातहूणा
द्याः पापिष्ठाअपियदाश्रयाः संतः शुध्यंति तस्मैविष्णवेनमः सःअजशंकरादिभिः वितर्क्यलिंगः भगवान् आत्मानः प्रसीदताम्
श्रियः पतिः यज्ञपतिः प्रजापतिः यदुसात्वतांपतिः मुकुंदः नःप्रसीदताम् कवयः यदंघ्रिध्यानेन आत्मतत्वं अनुपश्यंति सःनः प्रसीद
ताम् किंच येनपुराप्रेरितासरस्वती ब्रह्मणोमुखेभ्यः प्रादुरभूत् सःऋषभः नःप्रसीदतां यःपुरुषः इमान्देहान्निर्मायतेषुशेतेसःमेवचांसि ३
अलंकरोतितस्मैवासुदेवायनमः हेराजन् एतदेवब्रह्मानारदायहरिणोक्तं अकथयत् २५ इतिद्वितीयेचतुर्थः ४ नारदउवाच

हे देवदेवतेनमः मह्यंतत् ज्ञानं कथय येन आत्मतत्त्वं विजानीयाम् किंच एतत् विश्वं यदाश्रयं येन सृष्टं यस्मिन् लीयते तत् सर्वं भ-
वान् वेद सृष्ट्यादित्वं करोषि सः त्वं घोरं तपश्चरसि अतः ईश्वरांतरशंकां प्रयच्छसि एतन्मे वद ब्रह्मोवाच हे वत्स तव प्रश्नः स
मीचीनः यतः अहं भगवद्वीर्यदर्शने प्रेरितः त्वया मत्तः परं अविज्ञाय पृष्टम् येन भगवता स्वप्रकाशेन प्रकाशितं विश्वं अहं सृ
ष्ट्वा व्यक्तं करोमि तस्यैवास्कदेवाय धीमहि हे पुत्र तत्त्वतः वासुदेवात्परः अन्यः अर्थो न नारायणपरा वेदा देवा नारायणांगजाः ना
रायणपराः लोकाः मखाः योगः तपः ज्ञानं गतिः सर्वं नारायणपरं तस्य दृष्ट्या प्रेरितः अहं सृजामि विभुना सत्त्वरजस्तमोगुणाः
स्थिति सर्गनिरोधेषु गृहीताः ते मुक्तमपि जीवं बध्नंति सः भगवान् सर्वेषां मम च ईश्वरः तस्य सृष्टिप्रकारमाह सः विविधं भ
वितुं इच्छन् कालादीन् उपाददे ततः पुरुषाधिष्ठितात् कालात् गुणक्षोभो जातः स्वभावाद्रूपांतरापत्तिः कर्मणः महत्तत्त्वम् महतः
अहंकारः सः त्रिधा तत्र तामसात् शब्दवन्नभः अभवत् नभसः स्पर्शवान् वायुः तस्मात् रूपवत्तेजः तस्मात् रसवत् जलम्
तस्मात् गंधवती पृथ्वी सात्त्विकाहंकारात् मनः इंद्रियाधिष्ठात्र्यो देवताश्च अभवन् राजसात् दश इंद्रियाणि बुद्धिः प्राणश्च
एते भावाः अमीलिताः संतः शरीरनिर्माणे न शेकुः तदा अन्योन्यं मिलित्वा समष्टिव्यष्ट्यात्मकं शरीरं ससृजुः तत् उदके शयम्
अचेतनं ब्रह्मांडं वर्षपूगसहस्रांते परमात्मा चेतयति स्म ततः स एव पुरुषः अंडं निर्भिद्य निर्गतः सहस्रोर्वंघ्रिबाह्वक्षः सहस्रा
ननशीर्षवान् तस्य मुखं ब्राह्मणाः बाहुभ्यः क्षत्रियाः ऊर्वोः वैश्याः पद्भ्यां शूद्राः तस्य पद्भ्यां भूर्लोकः कल्पितः नाभितः भुव
र्लोकः हृदा स्वर्लोकः उरसा महर्लोकः ग्रीवायां जनलोकः स्तनयोः तपोलोकः मूर्द्धभिः सत्यलोकः तत्कट्यां अतलं ऊरुभ्यां
वितलम् जानुभ्यां सुतलम् जंघाभ्यां तलातलम् गुल्फाभ्यां महातलम् प्रपदाभ्यां रसातलम् पादतलतः पातालं अथवा

भूर्लोकः पद्भ्यां कल्पितः भुवर्लोको नाभिः स्वर्लोको मूर्द्धा इति वा लोककल्पना इदं उपासकानां ध्यानयोगार्थं उक्तं ४१ इति द्वितीये पंचमः ५ ब्रह्मोवाच तस्य विराड्रूपिणः भगवतः मुखम् वाचां वन्हेश्च उत्पत्तिस्थानं तस्य त्वगादयः सप्तधातवः गायत्र्यादि छंदसां क्षेत्रम् हव्यकव्यामृतान्नानां षड्रसस्य वरुणस्य क्षेत्रं तज्जिह्वा तन्नासे सर्वासूनां वायोः गंधस्य अश्विनोश्च क्षेत्रम् तस्य चक्षुः रूपप्रकाशानां स्थानम् तस्य अक्षिणी दिवः सूर्यस्य च स्थानम् दिशां आकाशशब्दयोश्च तत्कर्णौ क्षेत्रं तस्य शरीरं वस्तुसाराणां सौभगस्य स्थानं स्पर्शवाय्वोः वृक्षादीनां च तस्य त्वक् रोमाणि च क्षेत्रम् केशश्मश्रुनखान्यस्य शिलालोहाभ्रविद्युताम् इंद्रादिलोकपालानां तस्य बाहवः क्षेत्रम् तस्य विक्रमः भूर्भुवः स्वः क्षेमस्य शरणस्य च स्थानम् सर्वकामानां तच्चरणौ क्षेत्रम् अपां वीर्यस्य सर्गस्य पर्जन्यस्य प्रजापतेः तच्छिश्नः स्थानम् तदुपस्थस्तु संतानार्थ संभोगसुखस्य स्थानम् यमस्य मित्रस्य मलत्यागस्य तत्पायुः क्षेत्रम् हिंसायाः निर्ऋतेः मृत्योः निरयस्य तद्गुदस्थानम् पराभूतेः अधर्मस्य तमसः तत्पृष्ठभागः नदनदीनां नाड्यः अद्रीणां अस्थीनि प्रधानस्य अन्नादिरसानां सिंधूनां भूतानां लयस्य च उदरम् लिंगशरीरस्य तद्धृदयं पदम् धर्मस्य मम तव कुमाराणां भवस्य च विज्ञानस्य सत्वस्य च तच्चित्तं क्षेत्रम् अहं भवान् भवः इत्याद्याः देवाः असुराः नराः नागाः खगाः मृगाः गंधर्वाप्सरसः यक्षाः रक्षोभूतगणोरगाः पशवः पितरः सिद्धाविद्याधाश्चारणाद्रुमाः अन्ये जलस्थलनभौकसः ग्रहर्क्षकेतवस्तारास्तडितस्तनयित्नवः सर्वं पुरुष एवेदं भूतं भव्यं भवच्च यत् तेन पुरुषेण इदं विश्वं व्याप्तम् सः सर्वं व्याप्य वितस्ति अधितिष्ठति यथा सूर्यः मंडलं बहिश्च यथा प्रकाशयति एवं पुरुषः विराड्देहं प्रकाशयन् ब्रह्मांडं प्रकाशयति सः अमृतस्याभयस्य च ईशः अस्य अंघ्रिषु भूतानि विदुः किंच गृहाद्याश्रमाः अस्य पादा आसन् सः दक्षिणोत्तरौ भोगापवर्गप्राप्तिसाध ४

ओ॰ ४ इंद्रियं. ओ॰ ४ नेत्रगोलके.

नभूमौ मार्गौ चलति स्म यस्मात् अंडं विराट् च जज्ञे तस्य ईश्वरस्य नाभिकमलात् अहं जातः सन् पुरुषावयवं विना यज्ञसंभारान् नापश्यम् ततः पुरुषावयवैः एते संभाराः मया संभृताः ते च पशवः यूपाः कुशाः भूमिः कालः पात्रादीनि व्रीहयः घृतादयः रसाः सुवर्णादीनि मृदः जलं वेदाः ३ होत्रादिकर्म यज्ञनामानि मंत्राः दक्षिणा व्रतानि देवतोद्देशः पद्धतिग्रंथः संकल्पः तंत्रं गतयः ध्यानानि प्रायश्चित्तं समर्पणम् एवं संपाद्य एतैरेव ईश्वरं अयजम् ततः मरीच्यादयः अयजन् ततो मनवः ऋषयः पितरः देवाः दैत्याः मनुष्याः विभुं ईजिरे भगवति नारायणे इदं विश्वं आहितं तेन नियुक्तः अहं सृजामि तद्वशः हरः हरति पुरुषरूपेण सः पाति हे तात इति ते कथितम् हे नारद यस्मात् मया हृदा हरिर्धृतः अतः मे वाणी मृषा न मे मनसः गतिर्मृषा न मे इंद्रियाणि असन्मार्गे न पतंति सोहं योगं आस्थाय यतः आत्मसंभवः तं नाध्यगच्छन् सोहं भवच्छिदं सुमंगलं तच्चरणं नतोस्मि यस्य गतिं अहं यूयं शिवः न विदुः अस्मदादयः यस्यावतारकर्माणि गायंति परं च तं विदंति तस्मै भगवते नमः सः एष कल्पे कल्पे सृजति हरति पाति तस्य भूम्नः पुरुष आद्यावतारः कालः स्वभावः प्रकृतिः एताः तस्य शक्तयः महान् महाभूतानि अहंकारः सत्वादिगुणः इंद्रियाणि विराट् वैराजः स्थावरं जंगमम् एतानि कार्याणि अहं शिवः विष्णुः इमे गुणावताराः दक्षादयः भवदादयः स्वर्गलोकखगलोकनृलोकतललोकानां पतयः गंधर्वविद्या-[illegible]णयक्षरक्षोरगनागानां नाथाः ऋषिपितृदैत्यसिद्धदानवानां ईशाः प्रेतपिशाचभूतकूष्मांडयादोमृगपक्ष्यधीशाः लोके [illegible]ऐश्वर्य तेज ओजः सहो बल क्षमा श्री ह्री संपत्ति बुद्धियुक्तम् एतत्सर्वं भगवद्विभूतयः हे ऋषे अथ पुरुषस्य अवतारान् प्राधान्यतः ते तुभ्यं अनुक्रमिष्ये ४५ इति द्वितीये षष्ठः ६ ब्रह्मोवाच यदा अनंतः क्षितितलोद्धरणार्थं वाराहीं तनुं बिभ्रत् सन् उद्यतः तदा अंतः समुद्रे प्राप्तं हिरण्याक्षं दंष्ट्रया ददार १ रुचेः आकूत्यां स यज्ञो नाम जातः सन् स्वस्त्रियां दक्षिणायां

स्फुयमान् देवान् अजनयत् सएवइंद्रः सन् लोकत्रयस्य आर्तिं यदा अहरत् तदास्वायंभुव मनुनाहरिरित्युक्तः २ कर्दम
गृहे देवहूत्यां कपिलोभूत्वा स्वमात्रे ब्रह्मविद्यांउक्तवान् ययासा मुक्तिंप्राप्तवती ३ अपत्यं इच्छतः अत्रेः तुष्टः सन् मया अह
मेवतुभ्यंदत्त इतियतः आहततः सः दत्तोजातः यत्पादपंकजयोः परागेन पवित्रदेहाः यदुहैहयाद्याः भुक्तिंमुक्तिंच आपुः ४
आदौ मयालोकसिसृक्षया यत्तपः तप्तं तस्य समर्पणात् सः चतुः सनो भूत्वा पूर्वकल्पस्य प्रलये उच्छिन्न संप्रदायं आत्मतत्वं
अस्मिन् कल्पेजगाद ५ धर्मस्य स्त्रियां मूर्त्यां नारायणो नर इति द्विमूर्त्या जज्ञे यस्मात् उत्पन्नाः स्वसदृशीः स्त्रीः दृष्ट्वा अप्स-
रसः तस्यतपोनाशं कर्तुं नशेकुः ६ उत्तानपादः समीपे सापत्नमातुर्वाग्बाणैर्विद्धः ध्रुवः बालोपितपस्तप्तुं वनंगतः तस्मै ध्रुवप
दं अदात् यत् मुनयः स्तुवंति ७ यदाऋषिभिः प्रार्थितः भगवान् तदानिरयेपतंतं वेनं रक्षित्वा पुत्रनामलेभे येन पृथुना
जगदर्थे पृथ्वी दुग्धा ८ नाभिराज्ञः सुदेव्यां ऋषभोभूत्वा जडयोगचर्यांचचार यांऋषयः पारमहंस्यंपदं आमनंति ९ सए-
वभगवान् ममब्रह्मणः यज्ञे हयशीर्षा आस यस्य नासापुटात् वेदलक्षणावाचो बभूवुः १० युगांतसमये भाविना वैवस्वत
मनुना मत्स्यो दृष्टः सः मन्मुखगलितान् वेदान् आदाययुगांतसलिले मुदाविजहार ११ अमृतलब्धये अमरदानवयूथपा
नां क्षीराब्धिं मथ्नतां सतां भगवान् कूर्मवपुः सन् मंदरगिरिं पृष्ठेन धृतवान् १२ देवभयहंता सईशः नृसिंहरूपंकृत्वा आप
तंतं हिरण्यकशिपुं ऊरौ निपात्य नखैर्विददार १३ सरसिग्राहेणपदेगृहीतः गजेंद्रः आर्तः सन् हे आदिपुरुषेत्याह तद्वचः श्रुत्वा च
क्रेण नक्रमुखं विदार्य तं शुंडायां प्रगृह्य उज्जहार १४ आदित्यानां मध्ये कनिष्ठोपि विष्णुः गुणैर्ज्येष्ठः यतः इमान् लोकान् पादन्यासैः
क्रांत्वा बलेः क्ष्मां त्रिपदयाञ्चा छलेन वामनरूपेण जगृहे १५ हे नारद हंसो भूत्वा भक्त्यातुष्टः सन् भागवतंनामज्ञानं भक्तियोगंचतु ५

ओ॰ ४ सनत्कुमारसनकसनंदनसनातनरूपः ओ॰ ८ पुन्नाम्नोनरकात्पितरंत्रायतेसौपुत्रः ओ॰ २ वामनः

भ्यंआह १६ मन्वंतरेषुमनुवंशधरः भगवान्स्वकीर्तिंविस्तारयन् दुष्टराजसुदंडंधत्ते १७ भगवान्लोकेअवतीर्य धन्वंतरिः सन्
नृणांरोगान्स्वनाम्नैवहंति यज्ञेभागंचलभते आयुर्वेदंच प्रवर्तयति १८ असौहरिः परशुरामो अवनिकंटकं क्षत्रं परशुना एकविं
शतिवारान् उत्पाटयति १९ सः हरिः इक्ष्वाकुवंशेरामनाम्नाअवतीर्य दशरथस्याज्ञायांतिष्ठन् सीतालक्ष्मणाभ्यांसहितः वनं
प्रवेक्ष्यति यस्मिन्विरोधंकृत्वा रावणः नाशंप्राप्स्यति यस्मै समुद्रः मार्गंदास्यति ततः स्वरुन्धहर्तुः रावणस्य गर्वंप्राणैः सह अपने
ष्यति २० सः हरिः दैत्यांशभूतराजसैन्यभारेणपीडितायाः भूमेः क्लेशव्यथाय रामेण सह कृष्णोभूत्वा अतिमानुषाणि कर्माणिक
रिष्यति अतः सः ईश्वरः अन्यथाबालेन पूतना प्राणहरणं पदाशकटोपवर्तनं जानुभ्यांगच्छता अर्जुनयोरुन्मूलनं नभाव्यम् किंच
अयंविषतोयपीथान् गोपान्जीवयिष्यति यमुनाजलशुद्धये कालियंउच्चाटयिष्यति दावाग्निनादह्यमानंव्रजंउद्धरिष्यति यशो
दासुतस्य बंधनार्थंयत् दामगृहीष्यति तत्तत् अस्यनपूर्यते ततः साअस्यमुखेभुवनानिवीक्ष्य शंकितमनाभविष्यति अयंवरु
णपाशात् नंदंमोक्ष्यति व्योमासुरेणबिलेपिहितान् गोपान् मोक्ष्यति गोकुलंवैकुंठेउपनेष्यति इंद्रेवर्षतिसति सप्तदिनानिएकक
रेणगोवर्द्धनंधारयिष्यति किंच रासोन्मुखः सन् रात्रौवनेक्रीडन् व्रजवधूनांहर्तुः शंखचूडस्यशिरः हरिष्यति किंच प्रलंबखरब
ककेश्यरिष्टमल्लेभयवननरकपौंड्रकशाल्वद्विविदबल्वलदंतवक्त्रसप्तोक्षशंबरविदूरथरुक्मिमुख्याः कांबोजमत्स्यादयः मृधे
अनेन मृत्युंयास्यंति एतत्सर्वंअन्यथानभाव्यम् २१ वासव्यांजातः व्यासः वेदद्रुमंशाखाभेदेनविभजिष्यति २२ ततः सः ईशः
लोकान्घ्नताम् दैत्यानांमोहायबुद्धवेषंकृत्वापाखंडधर्मंभाषिष्यते २३ यदात्रैवर्णिकाः पाखंडिनः स्युः शूद्राः राजानः स्युः
तदाकल्किरूपेणहरिः कलेःशास्ताभविष्यति २४ ततः जगत्सृष्टौतपः अहं नवप्रजेशाः स्थितौधर्ममखमनु देवराजा-

नः अंतेहरसर्पास्करा द्याः इमाः भगवतोविभूतयः हेनारदविष्णोः वीर्यगणनांकर्तुं कः अर्हति यस्यअंतंअहंमुनयश्चन-
विद्मः शेषोपि अस्यपारंनप्राप्नोति सएवभगवान् येषांदययेत् तेदेवमायांनरंति किंच अहंभवः प्रल्हादः मनुः तत्पत्नीपुत्र
कन्याः प्राचीनबर्हिः ऋभुः अंगः ध्रुवः इक्ष्वाकुः ऐलः मुचुकुंदः जनकः गाधिः रघुः अंबरीषः सगरः गयः नाहुषः मांधाता अ-
लर्कः शतधन्वा रंतिदेवः भीष्मः बलिः अमूर्तरयः दिलीपः सौभरिः उत्तंकः शिबिः देवलः पिप्पलादः सारस्वतः उद्धवः व्यासः
भूरिषेणः बिभीषणः हनुमान् शुकः पार्थः आर्ष्टिषेणः विदुरः श्रुतदेवः एतेभगवन्मायांविंदंतितरंतिच स्त्रीशूद्रादयोपिति
र्यक्जनाअपि तद्भक्ताश्चेत् मायांतरंति किंतत् भगवतः स्वरूपंतदाहमुनयः यद्ब्रह्मेतिविदुः तत् परमस्यपुंसः स्वरूपम् सः
भगवान् ते अभिहितः हेनारद मेभगवतोदितं भागवतंसंक्षेपेणोक्तंतत् त्वंविपुलीकुरु किंच नृणांहरौभक्तिर्यथाभविष्यति
तथावर्णय भगवतोमायांवर्णयतः शृण्वतश्चपुंसः आत्मामाययानमुह्यति ५२ इतिद्वितीयेसप्तमः ७ राजोवाच

हेब्रह्मन् अगुणस्यभगवतः गुणाख्यानेब्रह्मणाप्रेरितः नारदः यथाप्राह एतद्वेदितुमिच्छामि हेमहाभागयथाअ
हंकृष्णेमनः निवेश्यकलेवरं त्यक्ष्येतथाहरेः कथाः कथय कृष्णः स्वचेष्टितंशृण्वतांहृदिकर्णरंध्रेणप्रविष्टः सन् पापंहरति
अतःनिष्पापः पुरुषः मुक्तसर्वक्लेशः कृष्णपादमूलंनमुंचति ब्रह्मायदनुग्रहात् भूतानिसृजति एतेलोकाः पुरुषावयवैः क
ल्पिताः इतिशुश्रुम तस्मात् कल्पः विकल्पः कालानुमानंदेवादीनां आयुर्मानम् कालस्यगतिः कर्मगतयः सत्वादीनांप-
रिणामं भूपातालककुप्व्योमग्रहनक्षत्रभूभृताम् सरित्समुद्रद्वीपानांसंभवः पूर्वोक्तस्थानोत्पन्नप्राणिनांचसंभवः अंडको ६
शप्रमाणम् महतांचरितम् वर्णाश्रमधर्माः हरेरवतारानुचरितम् युगानियुगमानम् युगधर्माः राजर्षीणांधर्मः आपद्धर्मः त-

त्वानांसंख्यानम् पुरुषाराधनविधिः योगविधिः वेदोपवेदधर्माणांइतिहासपुराणयोश्चस्वरूपम् भूतानांअवांतरप्रलयः महा
प्रलयः इष्टापूर्तकाम्यानांत्रिवर्गस्यचविधिः जीवस्यबंधमोक्षातिरिक्तस्वरूपावस्थानम् पाखंडस्यसंभवः आत्मनःबंधमो
क्षौयथा स्वतंत्रः भगवान् माययायथाक्रीडति हेभगवन् एतत्सर्वं अनुपूर्वशः पृच्छतेमेवक्तुमर्हसि हेब्रह्मन् मेप्राणाः
अनशनात् नव्याकुलीभवंति कुतः अच्युतकथापीयूषप्राशनात् सूतउवाच राज्ञाएवंसंसदिपृष्टः ब्रह्मरातःप्री
तःसन् ब्रह्मसंमितंभागवतंपुराणंराज्ञेप्राह परीक्षिताकृतप्रश्नान् आनुपूर्व्येणवक्तुंउपचक्रमे २९ इतिद्वितीयेऽष्टमः
८ श्रीशुकउवाच जीवस्यदेहसंबंधः आत्ममायांविनानघटते संसारोपिमाययैव अहंममेत्यभिमानात् भवति
सएवजीवः यदानिरहंकारोभवति तदाभक्त्यामोक्षंएति पुराब्रह्माकमलेस्थितःसन् सृष्टिंकर्तुंऐक्षत तांसृष्टिंनाध्यग
च्छत् सःएकदाअंभसिचिंतयन् तपतपेतिउपाशृणोत् ततःदिव्यंवर्षसहस्रंअतपत् तदाभगवान्ब्रह्मणेस्वलोकंदर्श
यामास ब्रह्मातदाभक्तपतिंश्रियःपतिंयज्ञपतिंजगत्पतिंसुनंदनंदादिभिः पार्षदमुख्यैःसेवितंभृत्यप्रसादाभिमुखंकि
रीटिनंकुंडलिनंचतुर्भुजंपीतांबरंवक्षसिश्रियाअलंकृतंसिंहासनस्थंपंचविंशतितत्वैर्युक्तं अणिमाद्यष्टैश्वर्ययुक्तंप्रभुंद
दर्श तद्दर्शनेनहृष्यत्तनुः ब्रह्मातत्पादांबुजंननाम तदाभगवान्प्रीतमनाः ब्रह्माणंकरेस्पृशन्उवाच हेब्रह्मन् तेभद्रमस्तु
वांछितंवरंवरय ब्रह्मोवाच हेभगवन्सर्वेषांहृदाकाशेस्थितस्त्वंसर्ववेद तथापितवसूक्ष्मंस्थूलंचरूपंयथा
अहंजानीयांतद्विषयांमनीषांधेहि अहंत्वच्छिक्षितंकरवाणि अहंप्रजासर्गेयथानबध्येयं तथानुग्रहाण श्रीभग-
वानुवाच हेब्रह्मन्ममशास्त्रोत्थंज्ञानं तथा अनुभवः भक्तिः तत्साधनंचपरमगुह्यमस्ति तथापितुभ्यंकथयामि त्वंगृहाण

स्वरूपतः यावान् अहं यादृकसत्तावान् मेयथारूपाणिगुणाःकर्माणिच तथैवतत्वज्ञानं मदनुग्रहात् तवअस्तु हेब्रह्मन् सृष्टेः
प्राक् अहमेव आसम् अन्यत् स्थूलसूक्ष्मप्रधानादि नकिंचिदपि आस सृष्ट्युत्तरमपि अहमेवास्मि यदेतद्विश्वं तदपि अह-
मेव प्रलयेयः अवशिष्यते सोप्यहमेव एवंपरिपूर्णोऽहं वास्तवमर्थं विना आत्मनि यत् प्रतीयेत तदपि नप्रतीयेत तत्मम
मायांविद्यात् यथाहि चंद्रादि राभासः अर्थं विना प्रतीयते किंच राहुः ग्रहमंडले स्थितोपि नप्रतीयते तद्वत् किंच य-
थामहाभूतानि उच्चनीचेषु भौतिकेषु देहेषु सृष्ट्युत्तरं प्रविष्टानि अप्रविष्टानिच वर्तंते तथाअहमपि तेषु भूतभौतिकेषु
आत्मनः तत्वजिज्ञासुना एतावत्तमेव विचार्यम् तदेवाह अन्वयः कार्येषु कारणत्वेन अनुवृत्तिः कारणावस्थायांच तेभ्यो
व्यतिरेकः तथाजागृदाद्यवस्थासु तत्तत्साक्षितयान्वयः समाध्यादौ व्यतिरेकश्च एवं अन्वयव्यतिरेकाभ्यां सर्वत्र सर्वदा
यत्स्यात् तदेव आत्मा हेब्रह्मन् एतन्ममम तं चित्तैकाग्र्येण त्वं अनुतिष्ठ तेन त्वं कल्पेषु याः सृष्टयः तासु कर्तृत्वाभिनि
वेशं नयास्यसि श्रीशुकउवाच भगवान् परमेष्ठिनं एवं उपदिश्य अंतर्हितः तदाब्रह्मा तं नत्वा यथा पूर्वं असृ
जत् ब्रह्माप्रीतः सन् स्वसुताय नारदाय इदं दशलक्षणं भागवतं पुराणं आह नारदः ब्रह्म ध्यायते व्यासाय तत् आह सः म
ह्यंप्रोवाच अहं त्वयापृष्टः वैराजात् पुरुषात् इदं यथा आसीत् तत् व्याख्यास्ये अन्यांश्च कृत्स्नशः तव प्रश्नान् व्याख्या-
स्यामि ४९ इतिद्वितीयेनवमः ९ श्रीशुकउवाच अतःपरं लक्षणानि शृणु अत्र सर्गोविसर्गश्च स्थानं पोषण
मूतयः मन्वंतरेशानुकथानिरोधो मुक्तिराश्रयः दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम् वर्णयंति महात्मानः तदर्थः पंचभूतादी ७
नां जन्म सर्गः १ विसर्गोनाम मायागुणवैषम्यात् चराचर सर्गः २ भगवतः विजयत्वेन स्थितिः तत्स्थानम् ३ पोषणं नाम भक्तानुग्र-

हः ४ ऊतयोनामकर्मवासनाः ५ मन्वंतराणि इदंएकम् ६ ईशानुकथाः नामएकं ७ लयोनामप्रलयः ८ मुक्तिर्नामब्रह्मत्वेनस्थितिः ९ आश्रयोनामयतः सृष्टिनिरोधौस्यातां तत्परब्रह्मआश्रयः १० यः आध्यात्मिकः चक्षुरादिकरणाभिमानीसजीवःसोसावेवआधिदैविकः सूर्यादिः तत्रएकस्मिन्नेवद्विरूपभेदः यस्मात्सः आधिभौतिकोदेहः एतत्त्रितयं यः वेदसः आश्रयः इत्यभिधीयते सः पुरुषः अंडंनिर्भिद्यनिर्गतः सन् आत्मनः स्थानंइच्छन् आदौ अपः ससर्ज तासुस्थितत्वात् नारायणइत्यभिधीयते तस्यानुग्रहात्सर्वं संपद्यते उपेक्षयानश्यति एकएवसः नानात्वंइच्छन् गर्भरूपंविराट्देहं भूतेंद्रियदेवतारूपेणत्रिधा विभक्तवान् विचेष्टतः तस्य पुरुषस्य हृदयाकाशे इंद्रियमनोदेहानां शक्तयोजाताः ततः सूत्राख्यः प्राणः तेनचालयता क्षुत्तृषौउत्पन्ने भक्षयितुं इच्छोः तस्यमुखंनिरभिद्यत तत्रतालुअधिष्ठानं जिह्वाइंद्रियंरसोविषयः वरुणोदेवता एवंसर्वत्र अधिष्ठानम् · इंद्रियं · देवता · विषयइतिचतुष्टयं ज्ञातव्यं एवंविवक्षोः मुखात् वह्निवाक्‌वचनानि जातानि प्राणवायौप्रचलति नासिकेजाते वायुर्देवतागंधोवि॰ घ्राणंइं॰ दिदृक्षतस्तस्य अक्षिणीजाते तत्रअर्कः दे॰ चक्षुः इंद्रियंरूपंवि॰ श्रोतुंइच्छतः कर्णौदिशः श्रोत्रं शब्दः वस्तुनोमृदुकाठिण्यंजिघृक्षतः त्वक्‌रोमाणि वृक्षाः स्पर्शः जाताः कर्मचिकीर्षया हस्तौ बलंइंद्रः आदानंजिगमिषोः पादौ विष्णुः गतिः गमनं प्रजानंदार्थिनः शिश्नः उपस्थः प्रजापतिः मूत्रोत्सर्गकामसुखे मलंत्यक्तुमिच्छोः गुदं पायुः मित्रः उत्सर्गः शरीरांतरं जिगमिषोः नाभिद्वारं अपानं मृत्युः मरणम् अन्नपानं आदित्सोः कुक्षिः अंत्राणि नाड्यः आसन् तत्रअन्नसंग्रहेच्छोः कुक्ष्यं त्रसमुद्रतुष्टयइति पेयसंग्रहेच्छोः कुक्षिनाडिनदीपुष्टयः चिंतयितुमिच्छोः हृदयमनः चंद्रसंकल्पाः तथात्वक्‌चर्ममांसरुधिरमेदोमज्जास्थिधातवः जाताः एवंव्यष्टिजीवशरीरेष्वपिबोध्यम् एतत्भगवतः स्थूलंरूपं

ते व्याहृतम् द्वितीयं अनादिमध्यनिधनं वाङ्मनसः परं नित्यं सूक्ष्मरूपं च उक्तम् ज्ञानिनः उभे अपि मायासृष्टे इति मत्वा न गृण्हंति
सः ब्रह्मरूपधृक् भगवान् वाच्यवाचकतया सकर्माकर्मकः सन् नामरूपक्रियाः धत्ते प्रजापतीन् मनून् देवान् ऋषीन् पितृगणान्
पृथक् सिद्धचारणगंधर्वान् विद्याध्रासुरगुह्यकान् १ किन्नराप्सरसो नागान् सर्पान् किंपुरुषान् गणान् मातृरक्षःपिशाचांश्च-
प्रेतभूतविनायकान् २ इत्याद्येवं चतुर्विधजीवाः कर्मणां गतिरूपाः एतान् भगवान् ब्रह्मरूपेण सृजति विष्णुरूपेण पाति शि
वरूपेण हरति इत्थंभावेन भगवान् ते कथितः यस्मिन् इदं जगत् मायया आरोपितं हि अयं तु ब्राह्मः कल्पः उक्तः वक्ष्यमाणं पाद्मं
कल्पं शृणु शौनक उवाच हे सूत मैत्रेयः विदुरं प्रति तत्त्वं उवाच विदुरमैत्रेयसंवादः कुत्राभूत् विदुरस्य बंधुत्या-
गनिमित्तं चेष्टितं च कथय सूत उवाच एवं परीक्षिता पृष्टः शुकः विदुरमैत्रेयसंवादं यत् अवोचत् तत् वः अभिधा
स्ये ५१ इति श्रीमद्भागवतचूर्णिकायां द्वितीयस्कंधे दशमोऽध्यायः १० श्रीकृष्णार्पणमस्तु ॐ श्रीरस्तु ॐ